प्रतियोग्युपरक्तस्य तस्य तथात्वकल्पनन्तु प्रतियोग्यसत्त्वकालेऽसम्भवात् उत्पत्तेः प्राक् प्रतियोगिनोऽसत्त्वेन तेन सह प्रागभावस्य संबन्धस्यानौचित्यात् इत्यनागतावस्थापन्नकार्य्यात्मकत्वमुपादानस्य युक्तम् तस्मात् पटः न तन्तुभ्यो भिन्न इत्युपेयमिति भावः । संयोगाप्राप्त्यभावादिति । संयोगश्च अप्राप्तिः विभागश्च तयोरभावात् । तथाच संयोगाभावः विभागाभावश्च पृथक् अभेदसाधकः यथा पटस्तन्तुभ्यो न भिद्यते तत्संयोगानाश्रयत्वात् यद्यतो भिद्यते तयोः संयोगोदृष्टः यथा घटपटयोः । न च गुणेषु व्यभिचारः स्वमते तत्र तन्त्वभेदस्येष्टत्वात् द्रव्यत्वे सतीति हेतोर्विशेषणे च व्यभिचाराभावाच्च । अप्राप्तिर्वेति विभागस्येत्यर्थः तथा च संयोगानाश्रयत्वस्येव विभागानाश्रयत्वस्यापि अभेदसाधकत्वमिति भावः । गुरुत्वान्तरकार्य्याग्रहणादिति । अयमाशयः । अवयवतन्तुपरिमाणेनेव तद्गुरुत्वेन स्वापेक्षयाधिकं महत्परिमाणमिव गुरुत्वम् जन्यते, गुरुत्वञ्च स्वपतन इव स्वाश्रिततुलादण्डादेरवनतिविशेषे हेतुरिति नैयायिकादिभिरभ्युपगम्यते । तत्र यदि पटस्तन्तुभ्योभिद्येत तदा तदाश्रितगुरुत्वविशेषेण स्वाश्रिततुलादण्डादेरवनतिविशेषोऽत्र गृह्येत यथा एकपलिकस्वर्णापेक्षया द्विपलिकस्वर्णस्य, तथा च पटस्तन्तुभ्यो न भिद्यते गुरुत्वान्तरप्रयुक्तस्वाश्रिततुलादण्डाद्यवनतिविशेषग्रहणायोग्यत्वात् गुरुत्वान्तरयुक्तस्वर्णादिवत् तुल्यगुरुत्वयुक्तपदार्थे व्यभिचारवारणाय ग्रहणायोग्यत्वादित्युक्तं तस्य च पृथक् तुलादण्डारोपणेऽवनत्यन्तरस्य ग्रहणसम्भवात् तन्तुपटयोश्च न तथासम्भव इति अभिन्नत्वमित्यन्यत्र विस्तरः। तन्तुगुरुत्वस्य कार्य्यं स्वाश्रिततुलादण्डादेरवनतिविशेषस्तस्मात् कार्य्यान्तरम् अवनत्यन्तरं न दृश्यते न गृह्यते इत्यर्थः । अवीतानि व्यतिरेकव्याप्तियुक्तानि यथा च तत्र तत्र व्यतिरेकव्याप्तिस्तथानुपदं तत्रतत्र दर्शितं प्राक्। पटइति बुद्धिविषयाः व्यपदेशभाजश्चेति शेषः । फलितमाह न तन्तुभ्योऽर्थान्तरमिति । अभेदसाधकहेतोः सत्प्रतिपक्षितत्वमाशङ्कते स्वात्मनीत्यादि । क्रिया उत्पादनक्रिया, निरोधः प्रध्वंसस्तयोर्बुद्धिः तथा च कार्य्यकारणयोरभेदे कार्य्यस्य कारणात्मकत्वेन स्वतः स्वस्योत्पत्तिविनाशबुद्ध्यसम्भव इत्यर्थः । व्यपदेशः व्यवहारः अर्थक्रिया प्रयोजनोत्पादनं क्रियाव्यवस्था प्रावरणादिकार्य्यनियमः तेषां भेदः पश्चात्पुनर्द्वन्द्वः । तथा च कार्य्यकारणयोरभेदे तन्तुषु पट इति कथं भेदव्यपदेशः ? कथं वा प्रयोजनान्तरजनकता, ? प्रयोजनान्तरनियमश्च स्यादित्यर्थः । इत्यस्मात् प्रयोगः पटस्तन्तुभ्यो भिद्यते तत्कार्य्यत्वेन, तत्र नष्टत्वेन वा प्रतीयमानत्वात्, तन्तुषु पट इति व्यपदेशप्रयोजकसंज्ञाभेदात्, विभिन्नार्थसाधकत्वात्, कार्य्यभेदवत्त्वाच्च । इति पञ्चभिर्हेतुभिः सत्प्रतिपक्षितोऽभेदसाधकहेतुर्नाभेदसाधनायालमित्याशङ्कार्थः । समाधत्ते नैकान्तिकमिति । ऐकान्तिकं वास्तवमित्यर्थः तथा च तत्र तत्रावास्तवएव भेदव्यवहारो न वास्तवाभेदप्रतिद्वन्द्वीति भावः । एवञ्च बुद्धिमात्रस्य, व्यवहारमात्रस्य वा वास्तविकत्वप्रयोजकत्वे इदं रजतमितिबोधात् व्यवहाराच्च शुक्तिरजतस्यापि वास्तवत्वापत्तिः । तथा अर्थक्रियाक्रियाव्यवस्थाभेदयोश्च न भेदसाधकत्वम् एकस्यैव वह्न्यादेः प्रकाशनपाचनादिरूपनानाकार्य्याणां, विष्टीनां व्यस्तानां मार्गदर्शनादिकार्य्यस्य समस्तानां तु शिविकावाहनादिविभिन्नकार्य्यस्य च सम्पादनस्य दृष्टत्वात् तत्र तत्र हेतोर्व्यभिचारान्न तयोर्भेदसाधकतेति न सत्प्रतिपक्षितत्वमभेदसाधकहेतोरिति भावः । तदेव क्रमश उपपादयति एकस्मिन्नपीति । प्रध्वंसन्ते नश्यन्ति । कूर्म्मत इत्यनुषङ्गः अस्मिन् पक्षे च कूर्म्मे इत्यर्थः सार्व्वविभक्तिकः सप्तम्यास्तसिल् । यथाहेति भगवद्गीतायामिति शेषः । असतोऽसत्त्वाश्रयस्य, भावः सत्त्वम्, सतः सत्त्वाश्रयस्य न अभावः असत्त्वम्, सदसतोरेकत्र समावेशाभावादिति शेषः । आपादयति व्यतिरेकव्याप्त्या साधयति तथा च प्रावरणादिक्रियाभेदः कारणभेदं विना अनुपपन्न इति व्यापकः प्रावरणादिप्रयोजनभेदाभावः निवर्त्तमानः व्याप्यं कारणभेदाभावं निवर्त्तयन् कार्य्यस्य कारणाद्भेदम् साधयतीत्यर्थः । इति यन्मतं तदनूद्य नञा दूषयित्वा तत्र हेतुप्रदर्शनाय व्यभिचारं दर्शयति एकस्यापीति तथा च कार्य्यभेदाभावः न कारणभेदाभावव्यापकः एकस्मिन् वह्न्यादौ नानाकार्य्यदर्शनात् तथा च भेदसाधकहेतुर्व्यभिचारीति भावः । एवम् भेदसाधकहेतुषु दूषितेषु इदानीं आविर्भावादेः सदसत्त्वे विकल्पेन दूषयितुं शङ्कते स्यादेतदित्यादि । कृतमित्यव्ययम् अलमर्थकं कारणव्यापारेणेतितृतीयान्तान्वयि तथा च कारणव्यापारसाध्यं नास्ति तस्य स्वतएव सिद्धत्वादित्यर्थः । क्रियन्ते उत्पाद्यन्ते पटरूपेण व्यवह्रियन्ते इत्यपि बोध्यम् । यद्वि उभयवादिनोस्तुल्यदोषत्वं न तद्दूष्यमित्याशयेन प्रतिवन्दिरूपदूषणदानायाह अथासदुत्पद्यत इत्यादि। उत्पत्तिः